र्थः ॥७॥ सैनिकस्यमानाकरणे दोषमाह ॥ हीनमितिसर्वैः राजगुणैर्दीनमानादिलक्षणास्तेनास्मणगुणैर्हीनं नृपं प्लवाहवैः अभिहंतारं ॥ घातयन्तं नृपतिं स्वामिनं जनं नरेश्वरं सं
विग्नाः सैन्यास्त्यजंति ॥ अर्जितो दानाहि नैनते सत्कारपीएवेति भावः ॥९॥ रत्नार्थैः रत्नैरर्थैः धनैः स्वसंविभागेन यथार्हमंशकल्पनपेन पर्थः ॥१०॥ ततः स्वजानं जरं प्रजाद
रीनारेव हेलोरिजितः प्रावृद्धपयोजना ॥११॥ लज्जमानां मदसं कारोहणपलज्जांती एमेरणं करोपणं च रत्ना सहा प्राहि जनवाज धनुष्मता रामधनुर्द्धारिणा ॥१२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु॰ ॥३३४॥ ॥१३॥१४॥ अधर्मभीरुणेति छेदः ॥१५॥१६॥ सेन्द्रा दिवौकसोपि न त्वां धर्षयितुं शक्ता मत्प्रसादादिति भावः ॥१७॥१८॥१९॥ सयुक्ताः हर्षयुताः जनपदपीडनमकुर्वन्तस्त्वर्यां
॥२०॥ अभिषेकार्द्रं त्वां दृष्ट्वा जवेन सर्वेषामस्माकं मातरं कौसल्याममभिवाद्य च ॥२१॥२२॥ सीतालाभः प्रियः भ्रातृदर्शनं प्रियात्प्रियतरं ततः सुहृद्भिर्भवद्भिः सहितो भरतादि

अब्रवीच्च विमानस्थः सर्वान्वानरराक्षसान् ॥ सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणं ॥१३॥ मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः
अनुज्ञाता मया सर्वे यथेष्टं प्रतिगच्छत ॥१४॥ यत्तु कार्यं वयस्येन स्निग्धेन च हितेन च ॥ कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा ॥१५॥ किष्किं-
धां प्रतियाह्याशु स्वसैन्येनाभिसंवृतः स्वराज्ये वस लंकायां मया दत्ते विभीषण ॥१६॥ न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः
॥१७॥ अयोध्यां प्रतियास्यामि राजधानीं पितुर्मम ॥ अभ्यनुज्ञातुमिच्छामि सर्वांश्चामन्त्रयामि वः ॥१८॥ एवमुक्तास्तु रामेण वा-
नरास्ते महाबलाः ॥ ऊचुः प्रांजलयो रामं राक्षसश्च विभीषणः ॥१९॥ अयोध्यां गन्तुमिच्छामः सर्वान्नयतु नो भवान् ॥ मुद्यु-
क्ता विचरिष्यामः वनानि नगराणि च ॥२०॥ दृष्ट्वा त्वामभिषेकार्द्रं कौसल्याममभिवाद्य च ॥ अचिरेणागमिष्यामः स्वान्गृहान्नृपतेः सुत
॥२१॥ एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः ॥ अब्रवीद्राघवः श्रीमान्ससुग्रीवविभीषणान् ॥२२॥ प्रियात्प्रियतरं लब्धं यदहं ससु-
हृज्जनः सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥२३॥ क्षिप्रमारोह सुग्रीव विमानं वानरैः सह त्वमप्यारोह सामात्यो राक्षसेन्द्र
विभीषण ॥२४॥ ततस्तत्पुष्पकं दिव्यं सुग्रीवः सह सेनया ॥ अध्यारोहत्त्वरन् श्रीमान्सामात्यश्च विभीषणः ॥२५॥

भिः सह पुरीं गतः प्रीतिं लप्स्ये तत्प्रियात्प्रियतरमित्यर्थः ॥२३॥२४॥२५॥ ॥ ॥ ॥ ॥ राम॰ ॥३३४॥

परमासनसन्नमपायं ॥ २६ ॥ हंसयुक्तेनेति ॥ अत्र हंसयुक्तेन वाहकत्वाकारेण निर्मिता हंसा न त्वन्ये प्रहृष्टः हृष्टरोमा प्रतीतः हृष्टचेता ॥ २७ ॥ अत्र संवाधमित्यनेन विमानस
वैपुल्यमुक्तं ॥ २९ ॥ इति पंचविंशाद्युत्तरशततमः सर्गः ॥ १२५ ॥ अनुज्ञातमिति ॥ १ ॥ पातयित्वा संचार्य ॥ २ ३ ॥ अयोधनं युद्धस्थानं महद्विशसनं वधसाधनमुक्तं ॥ ४

तेषां हृष्टेषु सर्वेषु कौवेरं परमासनं ॥ राघवेणाभ्यनुज्ञातमुत्पपात विहायसं ॥ २६ ॥ ययौ तेन विमानेन हंसयुक्तेन भास्वता ॥ प्रहृष्टश्च प्र
तीतश्च बभौ रामः कुवेरवत् ॥ २७ ॥ ते सर्वे वानरर्क्षाश्च राक्षसाश्च महाबलाः ॥ यथासुखमसंबाधं दिव्ये तस्मिन्नुपाविशन् ॥ २९ ॥
इत्यार्षे रा॰ यु॰ पं॰ चविंशोत्तरशततमः सर्गः ॥ १२५ ॥ अनुज्ञातं तु रामेण तद्विमानमनुत्तमं ॥ हंसयुक्तं महानादमुत्पपात विहायसं ॥ १ ॥
पातयित्वा ततश्चक्षुः सर्वतो रघुनंदनः ॥ अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननां ॥ २ ॥ कैलासशिखराकारे त्रिकू
टशिखरे स्थितां ॥ लंकामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा ॥ ३ ॥ एतदायोधनं पश्य मांसशोणितकर्दमं ॥ हरीणां राक्ष
सानां च सीते विशसनं महत् ॥ ४ ॥ अत्र दत्तवरः शेते प्रमाथी राक्षसेश्वरः ॥ तव हेतोर्विशालाक्षि रावणो निहतो मया ॥ ५ ॥
कुंभकर्णोऽत्र निहतः प्रहस्तश्च निशाचरः ॥ धूम्राक्षश्चात्र निहतो वानरेण हनूमता ॥ ६ ॥ विद्युन्माली हतश्चात्र सुषेणेन मह
त्मना ॥ लक्ष्मणेनेंद्रजिच्चात्र रावणिर्निहतो रणे ॥ ७ ॥ अंगदेनात्र निहतो विकटो नाम राक्षसः ॥ विरूपाक्षश्च दुष्प्रेक्ष्यो महापार्श्वम
होदरौ ॥ ८ ॥

प्रमाथी ॥ प्रमथनशीलः राक्षस इति तदा हमभिप्रदर्शनं अग्रेपि सर्वत्र तद्युद्धसमभिप्रदर्शनमेव ॥ विमानस्यात्युच्छ्रायात्तत्सर्वं दृश्यं विप्रकृत्य क्षेपणाय
त ॥ ५ ॥ ६ ॥ ७ ॥ अंगदेन विकटो हत इत्यस्य उवादात्तदपि ज्ञातमिति बोध्यं ॥ ८ ॥

पु०
॥ ३३५ ॥ ९ बली बलिनौ ॥ १० ॥ दंष्ट्रनामा कश्चिद् हतवान् ॥ ११ ॥ १२ ॥ १३ ॥ साग्रेण सहस्रादप्यधिकया केनचित्पत्नीनां सहस्रेण परिवारिता ॥ १४ ॥ तीर्थमवतारः ॥ यत्रावतारे तां
रात्रिं समुद्रोत्तरणदिवसरात्रिं वयं उषिताः ॥ १५ ॥ नलसेतुर्मत्रिपकनामकृत नलसेतुः सुदुष्कराः ॥ तत्र हि गिरिकेतेनिभावावः ॥ १६ ॥ अपां वरुणालयत्वा

अकंपनश्च निहतो बलिनो ये च राक्षसाः ॥ त्रिशिराश्चातिकायश्च देवांतकनरांतकौ ॥ ९ ॥ युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावु
भौ ॥ निकुंभश्चैव कुंभश्च कुंभकर्णात्मजौ बली ॥ १० ॥ वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः ॥ मकराक्षश्च दुर्द्धर्षो मया युधि
निपातितः ॥ ११ ॥ श्च निहतः शोणिताक्षश्च वीर्यवान् ॥ यूपाक्षश्च प्रजंघश्च निहतौ तौ महाहवे ॥ १२ ॥ विद्युज्जिह्वोऽत्र निह
तो राक्षसो भीमदर्शनः ॥ यज्ञशत्रुश्च निहतः सुप्तघ्नश्च महाबलः ॥ सूर्यशत्रुश्च निहतो ब्रह्मशत्रुस्तथापरः ॥ १३ ॥ अत्र मंदो
दरी नाम भार्या तं पर्यदेवयत ॥ सपत्नीनां सहस्रेण साग्रेण परिवारिता ॥ १४ ॥ एतत्तु दृश्यते तीर्थं समुद्रस्य वरानने ॥ यत्र सागरमुत्ती
र्य तां रात्रिमुषिता वयं ॥ १५ ॥ एष सेतुर्मया बद्धः सागरे लवणार्णवे ॥ तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः ॥ १६ ॥ पश्य साग राम०
रमक्षोभ्यं वैदेहि वरुणालयं ॥ अपारमभिगर्जंतं शंखशुक्तिसमाकुलं ॥ १७ ॥ ॥ ॥ ॥ २३५ ॥

दिति विशेषणं सागरं पश्य ॥ १७ ॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

अथ प्रसंगागमे यत्प्रदेशागमनकाले मैनाकं दर्शयति हिरण्यनाभमिति ॥ हिरण्यनाभनामानं मैनाकं विश्रमार्थं अवलंबनेन रक्षणार्थं ॥ १९ ॥ समुद्रस्य कुक्षौ कुक्षिसमीपे
न्नतीरे एतत्स्कंधावारनिवेशनं सैन्यनिवासस्थानं पश्य त्वं अंगनाः ॥ अत्र सेतुमूले पूर्वं सेतुबंधनात्पूर्वं विभुर्महादेवः प्रसादमकरोत् मत्स्यापितत्वेनात्र स्थितो अस्य दिशः पूर्व
तपश्चकार मे ॥ सेतुमूले महादेवमीशानं हरजवासस्थापयाम् सवेलिंग हजपामासराघवः ॥ तस्य देवो महादेवः पार्वत्या सह शंकरः प्रत्यक्षमेव भगवान् दत्तवानव
रमुत्तमं ॥ यत्तत्पापस्थापितं लिंगं द्रक्ष्यंती हद्विजात्मज ॥ महापातकसंघहर्तालेशं पापं विनश्यति ॥ अत्रास्मिन्नेव पापानि यान्यत्र चर्म होदधौ ॥ दर्शनादेव लिंगस्य नाशं यांति

हिरण्यनाभं शैलेंद्रं कांचनं पश्य मैथिलि ॥ विश्रमार्थं हनुमतो भित्त्वा सागरमुत्तमं ॥ १९ ॥ एतत्कुक्षौ समुद्रस्य स्कंधावारनि
वेशनं ॥ अत्र पूर्वं महादेवः प्रसादमकरोद्विभुः ॥ २० ॥ एतत्तु दृश्यते तीर्थं सागरस्य महात्मनः ॥ सेतुबंध इति ख्यातं त्रैलो
क्येन च पूजितं ॥ २१ ॥ एतत्पवित्रं परमं महापातकनाशनं ॥ अत्र राक्षसराजोयमाजगाम विभीषणः ॥ २२ ॥

नसंशयः पापवतस्पापसंजिनाद्वो यावत्स्यात्स्यास्यतिमिति ॥ यावत्सेतु सृष्ट्यो वहस्यास्याम्पत्र निरोहितः ॥ ईश्वरात्मा भगवान् वासं पापीक्ष्य पश्चाद्राघवं सनंदी सगणो रुद्रस्तत्रैवांतर्धी
पत इति ॥ २० ॥ महात्मनः सागरस्य पवित्रं तीर्थं दृश्यते ॥ एतन्मसेतुनिर्माणस्थलप्रदेशनाम सेतुबंध इति ख्यातं महिमातिशयः त्रैलोक्येन च पूजितं च महिष्यति
॥ २१ ॥ एतत्परमं पवित्रं दर्शनात् सर्वपापविशिष्टमहापातकस्य विनाशनं सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहतीति स्मृतेः ॥ अत्र राजो विभीषणः ॥ अत्र सेतुबंधतीर्थे
एव समागतः ॥ २२ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु॰
॥२३३॥

२५॥ व्याद्धितास्य स्य विद्यतास्य स्यान्दुर्गारवे चारुरुपंदगीसम्प्रितमसनस्स दत ःएवं वानराः सुसुस्वुः॥२६ हृष्टरूपं त्र्यतिशयेन हर्षमशं सा पांरु१॥२७ इमेकाशी

नतुः खेदेनमहताहत्वाजामिंद्रजितस्वयं॥ हृष्टः स्वरथमास्थायक्नाम्दन्चमहाखनं॥२५ वानराः सुसुवुः श्रावमहरे विमव स्थिताः
व्यं दितास्यस्य नदतस्तद्गीसं स्थितस्य च॥२६॥ तथातुसीजां विनिहस्तुद्भीजिःप्यहरूश्चेताः सवमवलवलिाः तं हृष्टरूपस्समुदी स्यवानरावि
सहरूपाः समभिमद्रद्रुवुः॥२७॥ इत्यार्षे॰ श्री॰ वा॰ सु॰ दं॰ १ काण्डे त्रि नमः सर्गः॥८१॥ श्रुत्वा तं भीमनिह्रादं रणकाशानिसमस्वनं वी
क्षमाणाः दिशः सर्वाद्रुद्रुवुर्वानराः भृशं॥ १॥ तानुवाच ततः सर्वान्हनूमान्मारुतात्मजः॥ विषण्णवदनान्दीनान्त्रस्तान्विद्रव
तः पृथक्॥ २॥ कस्माद्विषण्णवदना विद्रवध्वं प्लवंगमाः॥ त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतं॥ ३॥ पृष्ठतोनुव्रजध्वं मामग्रतो यांतमाहवे॥ एवमुक्त्वा सुसंहृष्टो वायुपुत्रो महामना॥ शैलशृंगान्द्रुमांश्चैव जगृहे हृष्टमानसः॥ ४॥ अभिपेतुश्च गर्जंतो राक्ष
सान्वानरर्षभाः॥ परिवार्य हनूमंतं मन्वयुश्च महाहवे॥ ५॥ स तैर्वानरमुख्यैस्तु हनूमान्सर्वतो वृतः॥ हुताशन इवार्चिष्मानदह
च्छत्रुवाहिनीं॥ ६॥ स राक्षसानां कदनं चकार सुमहान्कपिः॥ वृतो वानरसैन्येन कालांतकयमोपमः॥ ७॥ स तु शोकेन चाविष्टः
कोपेन महता कपिः॥ हनूमान्रावणिरथे महतीं पातयच्छिलां॥ ८॥ ॥ ॥

त्रि नमः सर्गः॥८२॥ भीमो भीनिर्ह्रादः॥ शरवत्सं श्रुत्वा रं द्रुजितरतिघोषः शनिसमस्वनं नमिंद्रजितं वीक्षमाणा दिशोदद्रुवुः॥१॥२॥३॥४॥५॥६॥७॥८॥

राम॰
॥२३३॥

यु०

॥२३६॥

चित्रकाननामस्तवनादिदिव्यकाननोपेतायाः दृश्यते एषा सुग्रीवस्य पुरी किष्किंधा यत्र मया वाली हतः ॥ २२ ॥ प्रणयसाध्वसा प्रणयः साध्वसं च भर्तुः स्नेहेप्रवर्त्तननिमित्तं प्रसाः सा
२३ ॥ अहं तारापमुखतः तारा प्रमुखाभिः सुग्रीवप्रियभार्याभिः सह अन्येषां वानरेंद्राणां स्त्रीभिः परिवारिता त्वया सह अयोध्यां गंतुमिच्छे इच्छामीति संबंधः ॥ २४ ॥ २५ स्वमा

एषा सा दृश्यते सीते किष्किंधा चित्रकानना ॥ सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः ॥ २२ ॥ अथ दृष्ट्वा पुरीं सीता किष्किंधां वालिपालि
तां ॥ अब्रवीत्प्रश्रितं वाक्यं रामं प्रणयसाध्वसा ॥ २३ ॥ सुग्रीवप्रियभार्याभिस्तारापमुखतो नृप ॥ अन्येषां वानरेंद्राणां स्त्रीभिः परिवृता ह
हे ॥ २४ ॥ गंतुमिच्छे सहायोध्यां राजधानीं त्वया सह एवमुक्तोथ वैदेह्या राघवः प्रत्युवाच तां ॥ २५ ॥ एवमस्त्विति किष्किंधां प्राप्य संस्थाप्य
राघवः विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह ॥ २६ ॥ ब्रूहि वानरशार्दूल सर्वान् वानरपुंगवान् ॥ स्त्रीभिः परिवृताः सर्वे ह्ययोध्यां यां
तु सीतया ॥ २७ ॥ तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल ॥ अभित्वरय सुग्रीव गच्छामः प्लवगाधिप ॥ २८ ॥ एवमुक्तस्तु सुग्रीवो
रामेणामिततेजसा ॥ वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः ॥ २९ ॥ ॥ ॥

स्त्वितीत्युक्त्वा किष्किंधां प्राप्य तत्र विमानं संस्थाप्य सुग्रीवं प्रेक्ष्य राजा इदं वाक्यमुवाच ॥ २६ ॥ ब्रूहीत्यादिश्लोकद्वयमेकं वाक्यं सर्वे भवंतः सीतया हेतुभूतया सीताप्रियार्थं स्त राम०
दारसहिताः संतः अयोध्यां यांत्विति वानरपुंगवान् ब्रूहि त्वमपि सर्वाभिः स्वस्त्रीभिः सहायोध्यां गंतुं अभित्वरय त्वरां कुरु सर्वाभिः सह गच्छाम इति संबंधः ॥ २७ ॥ २८ ॥ तैर्वानरैः २ ॥२३६॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प्रिये त्वमित्यादि श्लोकद्वयमेकं वाक्यं हे प्रिये मैथिलीप्रियकाम्यया मैथिल्याः प्रियं कर्तुमिच्छया राघवेणाभ्यनुज्ञातां नारीणां वानरनारीभिः सहत्वमभ्यनुज्ञा
ता अतो वानरयोषितो गृह्य गृहीत्वा गं त्वरं कुरु तत्सर्वाभिः सह गच्छामः ताः सर्वा मया अयोध्यां दशरथस्त्रियः प्रद्रक्ष्यामः ॥ २० ॥ २१ ॥ २२ ॥ वचनप्रकारमेवा
ह ॥ सुग्रीवेणेत्यादि श्लोकद्वयेन ॥ सुग्रीवेणाभ्यनुज्ञाता अपि सर्वैर्वानरैः स्वस्वभर्तृभिः सहगंतुमयाचितेति शेषः किं च मद्वसतीभिरयोध्यादर्शनेन मम

प्रविष्टं तैः पुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत् ॥ प्रिये त्वं सह नारीणां वानराणां महात्मनां ॥ २० ॥ राघवेणाभ्यनुज्ञाता मै
थिली प्रियकाम्यया ॥ त्वरत्वमभिगच्छामो गृह्य वानरयोषितः ॥ अयोध्यां द्रक्ष्यामः सर्वा दशरथस्त्रियः ॥ २१ ॥ सु
ग्रीवस्य वचः श्रुत्वा तारा सर्वांगशोभना ॥ आहूय चाब्रवीत्सर्वा वानराणां तु योषितः ॥ २२ ॥ सुग्रीवेणाभ्यनुज्ञाता गं
तुं सर्वैश्च वानरैः ॥ मम चापि प्रियं कार्यमयोध्यादर्शनेन च ॥ २३ ॥ प्रवेशं चैव रामस्य पौरजानपदैः सह ॥ विभूतिं चै
व सर्वासां स्त्रीणां दशरथस्य च ॥ २४ ॥ तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः ॥ नेपथ्यविधिपूर्वं तु कृत्वा चापि प्र
दक्षिणं ॥ अध्यारोहन्विमानं तत्सीतादर्शनकांक्षया ॥ २५ ॥ ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः ॥ ऋष्य
मूकसमीपे तु वैदेहीं पुनरब्रवीत् ॥ २६ ॥ दृश्यतेऽसौ महान्सीते सविद्युदिव तोयदः ॥ ऋष्यमूको गिरिश्रेष्ठः कां
चनैर्धातुभिर्वृतः ॥ २७ ॥

पि प्रियं कार्यं जनदर्शनं ममापि प्रियमिति भाव ॥ २३ ॥ प्रवेशं चेति पप्रच्छ मर इति शेषः दशरथस्त्रीणां विभूतिमैश्व
र्यं च पप्रणामः ॥ २४ ॥ नेपथ्यविधिरलंकारविधिः ॥ प्रदक्षिणा वानराणां विमानस्य अन्वत्ताभिः सहोत्थितमित्यनेन चन्द्र पर्यायाः किष्किंधायामुषित्वा पं
चम्यां ततः प्रस्थानमिति गम्यते ॥ उपरि पंचम्यां भरद्वाजाश्रमप्रवेशस्य वक्ष्यमाणत्वात्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

२९ ॥ नलिनी पद्मिनी ॥ विललापबहुलवं ॥ ३२ ॥ आसाली रेपंकाधुतीरे ॥ ४० ॥ अत्र पंपोत्तरदेशे वनस्पतिः जयपोरावास न्यग्रोधः ॥ ४१ ॥ ४२ ॥ ए
तजत्तदाश्रमपदं पं चचरा आश्रमस्यानतिरूपर्थं ॥ पत्रपत्रांपर्णशालाया ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ तापसा वासाः आस्मिदेशे वर्षाणि पत्रेषिजितिजिमा

अत्राहं वानरेन्द्रेण सुग्रीवेण समागतः समयश्च कृतः सीते वधार्थं वालिनो मया ॥ ३९ ॥ एषा सा दृश्यते पंपा नलिनी चित्र
कानना ॥ त्वया विहीनो यत्राहं विललाप सुदुःखितः ॥ ३२ ॥ अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी ॥ अत्र योजनबाहुश्च
कबंधो निहतो मया ॥ ४० ॥ दृश्यते सौ जनस्थाने सीते श्रीमान् वनस्पतिः ॥ ४१ ॥ जटायुश्च महातेजास्तव हेतोर्विलासिनि ॥
रावणेन हतो यत्र पक्षिणां प्रवरो बली ॥ ४२ ॥ एतत्तदाश्रमपदमस्माकं वरवर्णिनि ॥ पर्णशाला तथा चित्रा दृश्य
ते यत्र पक्षिणां प्रवरो बली शुभदर्शने ॥ यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात् ॥ ४३ ॥ एषा गोदावरी रम्या प्रसन्नसलि
ला शिवा ॥ अगस्त्यस्याश्रमो ह्येष दृश्यते पश्य मैथिलि ॥ ४४ ॥ दीप्तश्चैवाश्रमश्चैष सुतीक्ष्णस्य महात्मनः ॥ ४५ ॥ वै
देहि दृश्यते चासौ शरभंगाश्रमो महान् ॥ उपयातः सहस्राक्षो यत्र शक्रः पुरंदरः ॥ ४६ ॥ एते ते तापसावासा दृश्यन्ते तनुमध्यमे
अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरप्रभः ॥ ४७ ॥

वः कुलपतिः आश्रमस्वामी कुलमन्नपानसंदानयहोत्पन्नाश्रमेषु चेमनयः ॥ ४७ ॥

तापसी अनसूया ॥४९॥४८॥५०॥ यत्र गुहः समागतः सलक्ष्मणः शृंगिवेरपुरमेत ह पुण्यतोया त्रिपथगा ॥५१॥ एष मालिनी इदसा कमिलीरेपागानं तरं कीर्णमर्थे शिवा
भिः सुलक्ष्मणवती ॥५२॥ एषा सा मम पितुः राजधानी अयोध्या हे पुण्ये वैदेहि पुनरागता अयोध्या बहिः पुण्य प्रणामं कुरु ॥ गंगातीरव त्रि भरद्वाजाश्रमप्रदेशग

अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी ॥ असौ सीते महाकायो विराधो निहतो मया ॥४९॥ असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रका
शते ॥ एष नर्मा कैकेयीपुत्रः प्रसादयितुमागतः ॥५०॥ एषा सा यमुना दूरात् दृश्यते चित्रकानना ॥ भरद्वाजाश्रमो यत्र श्रीमानेष
प्रकाशते ॥५१॥ एषा त्रिपथगा गंगा दृश्यते वरवर्णिनि ॥ नानाद्विजगणाकीर्णा संप्रपुष्पितकानना ॥ शृंगिवेरपुरं चैतत् गु
हो यत्र समागतः ॥५१॥ एषा च दृश्यते सीते सरयूर्यूपमालिनी ॥ नानातरुशताकीर्णा संप्रपुष्पितकानना ॥५२॥ एषा च दृश्य
ते सीते राजधानी पितुर्मम ॥ अयोध्यां कुरु वैदेहि प्रणामं पुनरागता ॥५३॥ ततस्ते वानराः सर्वे राक्षसश्च विभीषणः ॥ उत्प
त्योत्पत्य ददृशुस्तां पुरीं शुभदर्शनां ॥५४॥ ततस्तु तां पाण्डुरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिसंकुलां ॥ पुरीमपो
ध्यां ददृशुः प्लवंगमाः पुरीं महेन्द्रस्य यथामरावतीं ॥५५॥ इत्या॰ वा॰ यु॰ षड्विंशच्छततमः सर्गः ॥१२६॥ पूर्णे चतुर्दशे व
र्षे पंचम्यां लक्ष्मणाग्रजः ॥ भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिं ॥१॥ ॥

विमानस्यास्तु तत्रोद्योमप्रदेशान्निर्वादयोध्यादर्शनं बोध्यं ॥५३॥५४॥ विशालकक्ष्यां विशालरथ्यां ॥५५॥ इति षड्विंशश्लोकात्मकः सर्गः ॥ पंचम्यां चतुर्दशे
॥ पूर्णे चतुर्दशे वर्षे सति तद्दिने भरद्वाजाश्रमं प्राप्य नियतो जितेन्द्रियो लक्ष्मणाग्रजो मुनिं भरद्वाजं ववंदे ॥१॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प्र॰ भगवान्पुरेऽयोध्यायां समिक्षा नाम पंभिक्षं तत्र जिनभिक्षाच्चत्रानिभिक्षाणां समन्वहि। सभिक्षं चानामपत्राम्भा चोऽन्नामपंसुभिक्षं चानामपंवसभिक्षान्नामपं॥ अत्र
॥२२५॥ समन्विमारोप्यं चन्त्रणोषिकश्चिज्जशिष्यसत्वादिजिष्णेषः॥२॥ भगतः सपक्षःअजापालने समाहितः कश्चित्तमानरोऽजीवं त्वपि च काञ्चित्स्मितं पूर्वं सर्वज्ञोपिम
गवानजानत्रिचमापृच्छतीति स्मितं हत्वा म्पृहस्वत॥ प्रहृष्टाहंमन्तुवाच॥२॥ ते पाडुकेपरह्रस्मसर्वं चकुशलं गहे पुरेच संपादपरभजेत्वां प्रतीक्षते॥४

सोपृच्छदभिवाघेनं महाराजंजपोषधं॥ भ्रणोषिकश्चिभगवन्समिक्षानामपंपुरे॥२॥ कश्चित्समन्त्रक्रोभरतोऽजीवं त्वपि च मा
तः॥ एवमुक्तस्तु तमेतामहाराजोमहामुनिः॥ मन्त्रवाचप्रहृष्टात्मा स्मितं पूर्वं प्रहृष्टवत्॥३॥ आज्ञावशास्ते भरतोऽजरिलत्वाम
तीक्षते॥ पादुके ते परह्रस्म सर्वं च कुशलं गहे॥४॥ त्वं प्राचीरवसनं प्रविश्यतमहावने॥ चोरतीपं चत्रोऽगत्वा द्वर्मकां मंचकेव
लं॥५॥ पदाजित्य कसवु त्वपितमिरे शकारीणां सर्वं भोगपरित्यक्तगोत्रं तमिवामरं॥६॥ हृष्ट्वा तु कहणा एवं ममासीन्त
मिनिजप॥ कैकेयी च चनेपक्रंवम्य मन्त्रफलाप्तानं॥७॥ सम्पतेसु समहा यसमित्रगणवांधवं॥ समीक्ष्य विजितात्मिंच ममाम्भ
तमीजिहन्ममा॥८॥ सर्वं च सुखदः खं ते विदितं मम माणव॥ पत्वपाविपुलं प्रासंजनस्पानवधादिकं॥२॥

॥५॥६॥ उच्यमानविनष्टेषणां तां हष्टामम पुराकहणा दैन्यमासीत॥५॥ सांप्रतंतु समहत्वा दिगुणां समीक्ष्य ममउत्तमा प्रीतिरभूज्जातेत्यर्थः॥ उत्रमेसमेनरदेव
कार्पकहणा हेतत्पातत्र वैभपिकाचित्प्रीतिरासीदितिघोत्पते॥८॥ सर्वे ते सुखदुःखं विदितं मित्पेनतनयकोशपतिपत्वपेतिजनस्पानमिवासे नात्रपापहिंड
लेखरवधादिकाउत्पंभासंजनममविदितं॥२॥ लम॰ ॥२२५॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

तदनंतरं ब्राह्मणार्थे वृत्रसविदां ब्रह्मर्षीणां यपोजनेरक्षाय योजने निकृत्तस्य तस्य सर्वजनापमानात् रक्षतस्तव भार्यापि हृतापि वधूवेषेनैव विदितं ॥१०॥ मारीचदर्शनं तावत्
सभीतापहारपर्यन्तमितिशेषः तस्य मारीचस्य ॥११॥ वानरान्वजनस्य कर्म समुद्रलंघनादि लंकादहनं ॥१२॥ प्रहृष्टैर्हरियूथपैर्लंकादीपितेतिपदद्वयं जिह्वाननं तां हनूमत
पादवलदर्पितः सपुत्रबांधवामात्यो रावणो निहतः यथा च ते त्रिदशैः समागमः यथा तैर्वरश्च दत्तः एतत्सर्वं तपसा मम विदितं ॥ हे धर्मवत्सल इतो मद्रास्त्रमा

ब्राह्मणार्थे निकृत्तस्य रक्षतः सर्वतापसान् ॥ एवं तीन हृता भार्या पीवमूर्वेपमनिदिता ॥१०॥ मारीचदर्शनं चैव वतस्योत्रपयनमेवच क
वंधदर्शनं चैव पंपाभिगमनं तथा ॥११॥ सुग्रीवेण च ते सख्यं यत्र वाली हतस्त्वया मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च ॥१२॥ विदिता
यां च वैदेह्यां नलसेतुर्यथा च निवेशितः ॥ यथा चादीपिता लंका प्रहृष्टैर्हरियूथपैः ॥१३॥ सपुत्रबांधवामात्यः सबलः सहवाहनः
यथा च निहतः संख्ये रावणो बलदर्पितः ॥१४॥ यथा च निहतेनास्मिन् रावणे देवकंटके समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः ॥१५॥
सर्वं ममैतद्विदितं तपसा धर्मवत्सल ॥ संपतंति च मे शिष्याः प्रवृत्त्याख्याः पुरीमितः ॥१६॥ अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर ॥ अ
र्घ्यं प्रतिगृहाणेदमयोध्यां प्रवेगमिष्यसि ॥१७॥ तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः ॥ बाढमित्येव संहृष्टः श्रीमान् वरमया चित

ये शिष्याः प्रवृत्त्याख्याः तव वृत्तिं वदंते तम वक्ष्यते यथा भक्ताः संजनत्वपुरीमयोध्यां संपतंति च मे शिष्यत्वेपि तवपरीवृत्तांतोज्ञापयतइतिशेषः ॥१३॥१४॥१५॥
॥१६॥ अहमपि त्रिदशाद्वेविभावः दद्मि दास्यामि अर्घ्यं मयि गृहाणामया दत्तं प्रतिगृहाण स्वयं वरं स्वयं वरणं जगद्वीमितिशेषः ॥१७॥ बाढमित्येव प्रतिग्र
हे इतिशेषः ॥१८॥

पु॰
॥३३२॥

वरमाहेत्यकालेति ॥२०॥ अयोध्यांप्रविशगच्छतोममार्गे एवंवृक्षाद्पीमचंद्रवानरांगां विभ्रामार्थमितिशेषः ॥२१॥२१॥ मधुनिश्रवंजीतिमधुश्रवा ॥२२॥ जपंजी
जिजितः स्वर्गस्यजितः स्वर्गस्याजितदवसुदान्वितात्स्येमसिद्धावानराः कामाथर्थेष्टसुपाश्रितिम ॥२३॥ इतिसप्तविंशाधिकशततमः सर्गः पंचम्यांचतुर्दशवर्ष
स्यपूर्णेनाजनहिजेभरद्वाजाश्रमेविलंबसमाप्तत्वाद्दुवदेशसमासौपदिश्वानपश्यामितदाहुताशंप्रवेश्यामीतिमारतीतोकेर्भगतस्यास्वागमननिवेदनाप्रदहन्

अकालफलिनोवृक्षाः सर्वे चापि मधुस्रवाः ॥ फलान्यमृतगंधीनि बहूनि विविधानि च ॥१२॥ मयैवंतुमार्गेभगवन्नयोध्यांप्रविशगच्छत ॥ त
पेतिचमतिज्ञातेवनान्समनंतरं ॥२०॥ अभवन्पादपास्तत्रस्वर्गपादपसन्निभाः निष्फलाः फलिनस्तत्र विपुष्पाः पुष्पशालिनः ॥२१॥
शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः ॥ सर्वतो योजनास्तिस्रो गच्छतामभवंस्तदा ॥२२॥ ततः प्रहृष्टाः प्लवगर्षभास्ते बहूनि दिव्यानि
फलानि चैव कामाद्गृहीत्वा जिमहत्वशालिसुदान्विताः स्वर्गजितामुदेव ॥२३॥ इत्या॰ श्री॰ वा॰ यु॰ सप्तविंशत्युत्तरशततमः सर्गः ॥१२७॥ अ
योध्यांतुसमालोक्यचिंतयामासराघव ॥ शिवकामः प्रियंरामस्तत्रत्वरितविक्रमः ॥१॥ चिंतयित्वाततोदृष्टिंवानरेषुन्यपातयत्
उवाचधीमांस्तेजस्वीहनूमंतंप्लवंगमं ॥२॥ अयोध्यांत्वरितोगच्छशीघ्रंप्लवगसत्तम ॥ जानीहिकच्चित्कुशलीजनोनृपतिमंदिरे ॥३॥

मनुष्येषुलोकेनतवानिम्राह ॥ अयोध्यात्विनिसृत्यालोक्यभरद्वाजाश्रमेविमानाद्वनरामस्यपेदेतिमाचुः चिंतयामासकर्तव्यंज्ञातमितिशेषः किंचस्यो
यादीनापिपकामं ॥ अयोध्यायांसर्वजनप्रियपदस्ताकामस्येप्सितंपयाभवत्तित्या ॥१२॥ पयाक्षिप्तमयोध्याप्राप्तेततयात्वरितः तत्रयोध्यागच्छनृपतिमं
दिरेवर्तमानः सर्वोपिजनः कुशलीतिजानीहि ॥३॥ ॥

राम॰
॥३३२॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

गहनं गोचरो देशो यस्य तं मम कुशलं मम वचनाद्ब्रूहि ॥ ४ ॥ गुहाय निवेदनस्य प्रयोजनमाह ॥ श्रुत्वेति आत्मसम इति हीनजातिमनन्वेष्यमेमानि शपेन गृहमिश्वा
कुकली नेमम्यते ॥ ५ ॥ प्रवृत्तिं वृत्तांतं ॥ ६ ॥ सिद्धार्थं कृतपितृवचनपरिपालनरूपप्रयोजनं ॥ ७ ॥ ८ ॥ समुद्रलंघनपितापप्यात्पालीता अधिगता अस्तव निलब्नुताय ४

श्रृंगिवेरपुरं प्राप्य गुहं गहनगोचरं । निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥ ४ ॥ श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरं ॥ भविष्यति
गुहः प्रीतः स ममात्मसमः सखा ॥ ५ ॥ अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च ॥ निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ ६
भरतस्तु त्वया वाच्यः कुशलं वचनान्मम ॥ सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणं ॥ ७ ॥ हरणं चापि वैदेह्या रावणेन बलीय
सा ॥ सुग्रीवेण च संवादं वालिनश्च वधं रणे ॥ ८ ॥ मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया ॥ लंघयित्वा महातोयमापगा
पतिमव्ययं ॥ ९ ॥ उपयानं समुद्रस्य सागरस्य च दर्शनं ॥ यथा च कारितः सेतू रावणश्च यथा हतः ॥ १० ॥ वरदानं महेंद्रेण ब्रह्म
णा वरुणेन च ॥ महादेवप्रसादाच्च पित्रा मम समागमं ॥ ११ ॥ उपयातं च मां सौम्य भरताय निवेदय ॥ सह राक्षसराजेन हरीणां प्रवरे
ण च ॥ १२ ॥ जित्वा शत्रुगणान् रामः प्राप्य चानुत्तमं यशः ॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ १३ ॥

याहदृष्टेत्यर्थः ॥ ९ ॥ उपयानं वानरसेनया सह समुद्रतीरागमनं सागरस्य दिव्यरूपधारिणो दर्शनं ॥ १० ॥ ब्रह्मणा वरुणेन चेति सहायैर्जीवा ॥ वरं वानरस्य
त्यायुः स्वं अत्र ब्रह्मवरुणयोरपि वरदानकर्तृत्वाभिधानाद्वरदानकाले ब्रह्मादयः समस्ता महेंद्रेण वरं प्रदातुं समागम्यत इति ॥ ११ ॥ उपयातं नगरसमीपमा
गतं ॥ १२ ॥ १३ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु॰ ॥३४०॥ एतच्छ्रुत्वा एवं प्रकारं मदागमनं श्रुत्वा प्रमाकारं त्विदानंदस्तत्वकं भुंजते स च त्वया वेदितव्यः पश्चादपि मां प्रति कर्त्तव्यं तच्च वेदयेथा ॥१४॥ नरदेवाद्यज्ञेयाः
नि सुखेन वर्गेन भीतिः स्वेदो चित्तविकारो गोत्र्यर्थः ॥ जनेन पाषाण्यैर्न रत्नानां ज्ञेयाः रत्नचयः ॥१५॥ तु पितामहं प्राप्तो हृदवनौ भरतस्य प्राप्तवपरीक्षतां न कर्त्तव्यं
त्या शंकनाह शानामपि हृदयस्य प्रापाशो राज्यं प्रियाकर्षणं संभाव्य नरस्मोह ॥ सर्वकामेति पितृपैतामहं ॥ पितृपितामहेभ्यः आगतं नावर्त्तये

एतच्छ्रुत्वा प्रमाकारं भजते भरतस्त्वजः ॥ स च ते विदितव्यः स्यात्सर्वं पश्चात्पि मां प्रति ॥१४॥ ज्ञेयाः सर्वे च वनौकास्ता भरतेस्य गि
ता निचु ॥ जनेत्रमुत्स्ववर्गेन हृष्ट्वा व्याभाषितेन च ॥१५॥ सर्वकामसमृद्धं हि हस्त्यश्वरथसंकुलं ॥ पितृपैतामहं राज्यं कस्य
नावर्त्तयेन्मनः ॥१६॥ संगत्या भरतः श्रीमान्राज्येनार्थी स्वयं भवेत् ॥ प्रशास्तु वसुधां सर्वामखिलां रघुनंदनः ॥१७॥ तस्य बुद्धिं च
विज्ञाय व्यवसायं च वानर ॥ यावन्न दूरं याताः स्मः क्षिप्रमागंतुमर्हसि ॥१८॥ इति प्रतिसमादिष्टो हनूमान्मारुतात्मजः ॥ मानुषं धार
यन्रूपमयोध्यां त्वरितो ययौ ॥१९॥ अथ योत्सपात वेगेन हनूमान्मारुतात्मजः ॥ गरुत्मानिव वेगेन जिघृक्षन्भुजगोत्तमं ॥२०॥

त्तापकर्षयन्न ॥१६॥ तस्य राज्याकांक्षा चेत्तर्हि किं करिष्यसीत्याशंक्यसमसरव राज्ये मयाभिषिक्तस्ताह संगत्येति संगत्या चिरकालवर्त्ती रूपेण राज्येनार्थी भवेत् हि
सत्य एव वसुधां प्रशास्तु वयं पत्रक्लापि तपसा कालं नेष्याम इति विशेषः ॥१७॥ यावद्दूरमादावश्रमाच्च दूरं याताः स्मः चयो ध्यायाः श्रितसमीपं न प्रयाताः स्मः तावत्तत्र सि राम॰
प्रमागंतुमर्हसि ज्ञात्वा क्षिप्रमेव ॥१८॥ यपौ यातुमयुक्तः ॥१९॥ अथ रूपयोगं नंतरं वेगेन जिघृक्षन्भुजगोत्तमः ॥२०॥ ॥ ॥३४०॥

पितृपथं वायुपथमार्गमंतरिक्षमित्यर्थः तद्विशेषो विहगेंद्रालयं श्रेष्ठविहगानां संचारस्थानं ॥२१॥ अथ पंचमीं पंचमीसंवेष्टिनीं रजनीमुषित्वा अद्य स्थितमशेवा
गमिष्यसीति भरद्वाजोक्तानंतरमेव वंशुवः प्राजरेवद्रष्टुमपि ॥२४॥ तं महृष्टतनूरुहः सकृत्सजनगदानंदकारी रघुनाथ पय स्यागमनं मया श्रव पितृव्य मित्यस्माद्धेतोरिति
भावः अविचारयन् अध्वस्मरमित्यशेषः ॥२५॥ रामजी र्थपरशुराममतीर्थं ॥ वालुकेनीं नदीं दाक्षां शालवनं प्राग्वरूथं ॥२६॥ २७ सुराधिपोपवने नंद

लंघयित्वा पितृपथं विहगेंद्रालयं शुभं । गंगायमुनयोर्भीमं समतीत्य समागमं ॥२१॥ शृंगिवेरपुरं प्राप्य गुहमासाद्य वीर्यवान् ॥ स
वाचा शुभया हृष्टो हनुमानिदमब्रवीत् ॥२२॥ सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः ॥ ससीतः सहसौमित्रिः स त्वां कुशल
मब्रवीत् ॥२३॥ पंचमीमद्य रजनीमुषित्वा वचनान्मुनेः ॥ भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यद्यैव राघवं ॥२४॥ एवमुक्त्वा महातेजाः संप्र
हृष्टतनूरुहः ॥ उत्पपात महावेगो वेगवानविचारयन् ॥२५॥ सोपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा ॥ वरूथीं गोमतीं चैव भी
मं सालवनं तथा ॥२६॥ प्रजाश्च बहुसाहस्रीः स्फीतान् जनपदानपि ॥ स गत्वा दूरमध्वानं त्वरितः कपिकुंजरः ॥२७॥ आससाद
द्रुमान् फुल्लान् नंदिग्रामसमीपगान् ॥ सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् ॥ स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः स्वलंकृतैः ॥२८
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनांबरं ॥ ददर्श भरतं दीनं कृशमाश्रमवासिनं ॥२९॥ ॥ ॥

नेचरे । चैत्ररथे कुबेरोद्याने च स्थितान् द्रुमान् यथा तद्वत् सदृशानित्यर्थः स्वलंकृतैः रममाणैः पुत्रैः पौत्रैः सहिताभिः स्त्रीभिः समाजाणउपलक्षितद्रुमविशेष
णां ॥२८॥ अयोध्यायाः क्रोशमात्रे इत्यादि कावृपगं जयमूमावाश्रमवासिनं कृशं दीनं भरतं ददर्श ॥२९॥ ॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विधेयाप्रैवः सारथ्यधीनाप्रैवः समाप्रुक्तः ॥ ९ ॥ सप्रिशिलावर्षमवनाच्चभवदिति शेषः ॥ १० ॥ ११ गिरिशृंगाणि चोद्यताः गृहीत्वेति शेषः ॥ १२ ॥ ततो वक्षशैलम
तामपतंतं तीक्ष्णैर्वरथः सारथिना नदा ॥ विधेयाश्वसमायुक्तो विहायस्यपवाहितः ॥ २ ॥ तमिंद्रजितमप्राप्य रथस्थं सहसारथिं ॥ वि
वेश धरणीं भीत्वा सा शिलावर्षसंघता ॥ १० ॥ पतितायां शिलायां तु व्यथिता रक्षसां चमूः ॥ निपतंत्या च शिलावाणराक्षसा मृधि
तां मृशं ॥ ११ ॥ ततमभ्यधावं स्थत शैलानुद्यतः कानने कसः ॥ ते द्रुमांश्च महाकायाः गिरिशृंगाणि चोद्यताः ॥ १२ ॥ क्षिपंतींद्रजितः से
नेवानराभीमविक्रमाः ॥ वृक्षशैलमहावर्षं विसृजंतः स्रवंगमाः ॥ १३ ॥ शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वनैः
वानरैस्तैर्महाभीमैर्घोररूपा निशाचराः ॥ १४ ॥ वीर्यादभिहता वृक्षैर्व्यचेष्टंत रणाजिरे ॥ स्वसैन्यमभिवीक्ष्याथ वा
नरार्दितमिंद्रजित ॥ १५ ॥ प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ ॥ स शरौघानवसृजन्स्वसैन्येनाभिसंवृतः ॥ १६ ॥
जघान कपिशार्दूलान्सुबहून्दृष्टविक्रमः ॥ शूलैरशनिभिः खड्गैः पट्टिशैः कूटमुद्गरैः ॥ १७ ॥ ते चाप्यनुचरांस्तस्य
वानरा जघ्नुराजसा ॥ १८ ॥ सस्कंधविटपैः सालैः शिलाभिश्च महाबल ॥ हनूमान्कदनं चक्रे रक्षसां भीमकर्मणां ॥

हा वर्षं विसृजंतं लेवानराइंद्रजितं क्षिपंतीन्सर्गिरथजंतं चकुरि जिपावत ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

यु॰
॥२४५॥

२० ॥ समुत्पतनजटाभारमिति ॥ सर्वजनतावाक्योक्तिः अत्र जनस्थानस्य समुत्पत्तितोक्तिरिति वैषम्यं ॥ वल्कलाजिनवाससमित्यत्र रीपोक्तिः पश्चिमं ॥ निपतन्ताहारे ॥ भावितात्मा
नं ॥ ध्यानपरमात्मानं अत एव ब्रह्मर्षिसमतेजसं ॥ २१ ॥ चातुर्वर्ण्यस्य लोकस्य त्राणे ध्यान्न चातुर्वर्ण्यरूपस्य लोकस्य सर्वतोभयात् ॥ त्रातारं ॥ २२ ॥ वलमुख्यैः व
लाध्यक्षैः युक्तैः सत्रद्वैः योगः सत्र हतो पापध्यानसंगति युक्तिः स्थित्यमरः ॥ २३ ॥ भ्रातृवियोगान्मरतस्य वल्कलादिधारणम् अत्र ब्रह्मात्मादीनां हि किं त्रिमित्रमित्याशं

जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितं ॥ फलमूलाशिनं दान्तं तापसं धर्मचारिणं ॥ २० ॥ समुन्नतजटाभारं वल्कलाजिनवाससं ॥ नियतं भा
वितात्मानं ब्रह्मर्षिसमतेजसं ॥ २१ ॥ पादुके ते पुरस्कृत्य प्रशासन्तं वसुंधरां ॥ चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात् ॥ २२ ॥ उप
स्थितममात्यैश्च शुचिभिश्च पुरोहितैः ॥ बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः ॥ २३ ॥ न हि ते राजपुत्रं तं चीरकृष्णाजि
नांबरं ॥ परिभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलाः ॥ २४ ॥ तं धर्ममिव धर्मज्ञं देहवन्तमिवापरं ॥ उवाच प्राञ्जलिर्वाक्यं हनुमान्मारुता
त्मजः ॥ २५ ॥ वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरं ॥ अनुशोचसि काकुत्स्थं स त्वां कौशलमब्रवीत् ॥ २६ ॥ प्रियमाख्या
मि ते देव शोकं त्यज सुदारुणं ॥ अस्मिन्मुहूर्ते भ्रात्रा त्वं रामेण सह संगतः ॥ २७ ॥ निहत्य रावणं रामः प्रतिलभ्य च मैथिलीं ॥ उ
पयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ २८ ॥

कुतस्तत्र कारणमाह ॥ न हि ते राजपुत्रमिति ॥ ते अमात्यादयः धर्मवत्सला वै पौरा अपि राजपुत्रं भरतं
परिभोक्तुं परित्यज्य भोक्तुं न व्यवस्यन्तीत्यर्थः ॥ २४ ॥ देहवन्तं मूर्तिमन्तं देहसंबन्धवन्तमपरं धर्ममिव स्थितं धर्मज्ञं तं भरतं हनुमान् प्राञ्जलिः सन्वाच हितमीप्सवशादेवाक्य
लं काले ॥ २५ ॥ २६ ॥ अस्मिन्मुहूर्ते अचिरादित्यर्थः संगतो भविष्यसीति शेषः ॥ अपरिचितत्वान्मरतेन हनुमानज्ञातो वदति ॥ २७ ॥ २८ ॥

राम॰
॥२४५॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

३९ ॥ उत्कटहर्षोऽपि चिंतयैव प्रश्नहेतुरिति ज्ञात्वा पृष्टवानित्याह ॥ ४० ॥ ४१ ॥ भरतः कपिमालिंग्य अशोकजैः शोकजाभिन्नैः प्रीतिमयैरानंदजैर्विपुलैरश्रुबिंदुभिः
सिषेच ॥ ४२ ॥ अनुक्रोशात् कृपया प्रियं ब्रुवतस्तेन त्वं धिनः प्रियाख्यानस्य ॥ प्रियकथनस्य गोग्रामकन्यादि लक्षमाणा ददामीति संबंधः ॥ ४३ ॥ ४४ ॥ ४५ ॥ रा

लक्ष्मणश्च महातेजा वैदेही च यशस्विनी ॥ सीता समग्रा रामेण महेंद्रेण शची यथा ॥ ३९ ॥ एवमुक्तो हनुमता भरतः कैकेयीसुतः
पपात सहसा हृष्टो हर्षान्मोहं जगाम ह ॥ ४० ॥ ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः ॥ हनूमंतमुवाचेदं भरतः प्रियवादिनं ॥ ४१ ॥ अ
शोकजैः प्रीतिमयैः कपिमालिंग्य संभ्रमात् ॥ सिषेच भरतः श्रीमान् विपुलैरश्रुबिंदुभिः ॥ ४२ ॥ देवो वा मानुषो वा त्वमनुक्रोशादिहागतः
प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियं ॥ ४३ ॥ गवां शतसहस्रं च ग्रामाणां च शतं परं ॥ सकुंडलाः शुभाचाराः भार्याः कन्यास्तु
षोडश ॥ ४४ ॥ हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः ॥ सर्वाभरणसंपन्नाः संपन्नाः कुलजातिभिः ॥ ४५ ॥ निशम्य रामागम
नं नृपात्मजः कपिप्रवीरस्य तदाद्भुतोपमं ॥ प्रहर्षितो रामदिदृक्षयाभवत् पुनश्च हर्षादिदमब्रवीद्वचः ॥ ४६ ॥ इत्यार्षे वा० रा० यु० अ
ष्टाविंशच्छततमः सर्गः ॥ १२८ ॥

मदिदृक्षया ॥ उपलक्षितो नृपात्मजो भरतः ॥ अद्भुतोपमं निरुपमं रामागमनं कपिप्रवीरस्य कपिप्रवीरात् निशम्य तदा प्रहर्षोऽभवत् हर्षात् पुनरपीदं वचोऽब्रवीदि
ति संबंधः ॥ ४६ ॥ इत्यष्टाविंशाधिकशततमः सर्गः ॥ १२८ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु.
॥३४२॥

वहूनीत्यादिश्लोकद्वयमेकं वाक्यं ॥ वहूनि वर्षाणि वनं जातस्य मम नाथस्य प्रीतिकरं कीर्त्तनं पुनः श्रणोमि अतो जीवंतं नरं वर्षशतादपि आनंद एतीति पुंसो लौकिकी गाथा यान
वातीमे कल्याणीसत्या प्रतिभातीति संबंधः ॥ १ ॥ २ ॥ सहमितैौरित्यस्य सुग्रीवादिमित्रसहितैरित्यर्थः तत्प्रवृत्तिं स्वगतस्य पृच्छति राघवस्येति ॥ किमाश्रित्या

वहूनि नाम वर्षाणि गतस्य सुमहद्वनं ॥ श्रणोम्यहं प्रीतिकरं मम नाथस्य कीर्त्तनं ॥ १ ॥ कल्याणी वत गाथेयं लौकिकी प्रतिभाति
मे ॥ एति जीवंतमानंदो नरं वर्षशतादपि ॥ २ ॥ राघवस्य हरीणां च कथमासीत्समागमः ॥ कस्मिन्देशे किमाश्रित्य तत्त्वमाख्या
हि पृच्छतः ॥ ३ ॥ स पृष्टो राजपुत्रेण वृस्यां समुपवेशितः ॥ आचचक्षे ततः सर्वं रामस्य चरितं वने ॥ ४ ॥ यथा प्रव्राजितो रामो मातुर्द
त्तवरे तव ॥ यथा च पुत्रशोकेन राजा दशरथो मृतः ॥ ५ ॥ यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात्प्रभो ॥ त्वयायोध्यां प्रविष्टेन यथा राज्यं न
चेप्सितं ॥ ६ ॥ चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्षणः ॥ निमंत्रितस्त्वया भ्राता धर्ममाचरता सतां ॥ ७ ॥ स्थितेन राज्ञो वचने यथा राज्यं
विसर्जितं ॥ आर्यस्य पादुके गृह्य यथासि पुनरागतः ॥ ८ ॥ सर्वमेतन्महाबाहो यथावद्विदितं तव ॥ त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध
मे ॥ ९ ॥ अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजं ॥ परिद्यूनमिवात्यर्थं तद्वनं समपद्यत ॥ १० ॥ ॥

स्यर्थः ॥ ३ ॥ वृस्यां व्रतिसमुचितासने ॥ ४ ॥ अत्र सत्रयपेक्षस्य पेनमकारेणान्वयः ॥ ५ ॥ राजगृहात् केकयपुरात् ॥ ६ ॥ ७ ॥ विसर्जितं रामेणोजितं विशेषः ॥ ८
॥ ९ ॥ परिद्यूनं परीतसंमापीडितमिति यावत् ॥ १० ॥

राम
॥३४२॥

ततस्तद्दहनंजां ॥ ११ ॥ १२ ॥ निरवातेगजेन्द्रपक्षिणंजितिमपक्षिपवंतावितसर्पथः ॥ १३ ॥ १४ ॥ १५ ॥ पश्चाज्ज्वलनस्थानोपगमनानंतरंरामपार्श्वंशूर्पणखाउपागता ॥ १६ ॥ तवैअंगम
खकर्णनासेविच्छेद ॥ १७ ॥ १८ ॥ अहरत्तुर्थभागेनरदंचरणस्समरशीमयद्रूसत्राहसीतीयहामेषणा दिसर्वव्यापारणवेक्षपापूर्हकालात्त्वथाधिकासुहृन्नेनेत्यागराग

ततोऽत्तिमहदिंतंघोरंसिंहव्याघ्रमृगाकुलं ॥ प्रविवेशापविजनंसुमहद्दंडकावनं ॥ ११ ॥ तेषांप्रालाद्दलवान्गच्छतांगहनेवने ॥ विनदन्
सुमहानादंविराधःप्रत्यदृश्यत ॥ १२ ॥ तमुत्क्षिप्यमहानादम्दृष्ट्वाऽयमधोमुखं ॥ निखातेप्रक्षिप्यजित्वानंदंतमपिवकुंजं ॥ १३ ॥ ततस्तौ
दृष्ट्वाकमश्राततौरामलक्ष्मणौ ॥ सापाहेघारभंगस्यामप्यमाश्रममीयतुः ॥ १४ ॥ शरभंगोदिवंप्राप्तेरामःसत्यपराक्रमः ॥ अभिवाद्यमुनी
नसर्वान्जनस्थानमुपागमत ॥ १५ ॥ पश्चाच्छूर्पणखानामरामपार्श्वमुपागता ॥ १६ ॥ ततोरामेणसंदिष्टोलक्ष्मणःसहसोत्थितः ॥
प्रगृह्यखड्गंचिच्छेदकर्णनासेमहाबलः ॥ १७ ॥ चतुर्दशसहस्राणिजनस्थाननिवासिनां ॥ हतानिवसताज्तत्रराघवेणमहात्मना ॥ १८ ॥ त
तोऽसहस्रमप्येरामहूदेवि ॥ अहःचतुर्थभागेननिःशेषाराक्षसाःकृताः ॥ महाबलामहावीर्यापसौविघ्नकारिणः ॥ १९ ॥
निहतास्तराघवेणाजौदंडकारण्यवासिनः ॥ राक्षसाश्चविनिष्पिष्टाःखरश्चनिहतोरणे ॥ २० ॥ दूषणंचाग्रतोहत्वात्रिशिरसमनंतरं ॥ त
तस्तेनाहितावालावणसमुपागता ॥ २१ ॥

कांडेउक्तः ॥ १९ ॥ २० ॥ ततःखरादिवधानंतरंतेनलक्ष्मणेनसर्वमहिमासावालामस्रवीणवरामुपागमतसमरेवैभकेनवालःस्यादितिमतः ॥ २१ ॥

पु.
॥ ३४३ ॥

॥ २२ मृगमिति शेषः दृष्ट्वा राममब्रवीत् ॥ हे देव आहे हे कान्त अयं मृगो गृह्यतां गृहीते नानेन आश्रमो नो मनोहरो भविष्यतीति संबंधः ॥ २३ ॥ अनुधावति स्म ॥ २४ ॥ २५ ॥ २६ सह
सा बलात्कारेण ॥ २७ ॥ विस्मिताकारा दृष्टाः सुग्रीवादयः अतिमानवाः ॥ २८ ॥ तद्विमानं मनोवत् गतिमान् त्रैलोक्ये गोपस्थितम् इति शेषः ॥ २९ ॥ सुवर्णपरिक्रान्ते सुवर्णोपलि

एवमगतव्रचरो घोरो मारीचो नाम राक्षसः ॥ लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ २२ ॥ राममब्रवीद्दृष्ट्वा वैदेही गृह्यतामिति ॥ आ
ह्येनं मनोहरः कान्त आश्रमो नो भविष्यति ॥ २३ ॥ ततो रामो धनुष्पाणिर्मृगं तमनुधावति स तं जघान धावन्तं शरेणानतपर्वणा ॥ २४ ॥ अ
प सौम्य दशग्रीवो मृगयां याते राघवे ॥ लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं त[illegible]दा ॥ २५ ॥ जग्राह तरसा सीतां ग्रहः खे रो
हिणीमिव ॥ त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषं ॥ २६ ॥ प्रगृह्य सहसा सीतां जगामाशु स राक्षसः ॥ ततस्त्वद्भुतसंकाशाः स्थिताः ॥ प
र्वतमूर्धनि ॥ २७ ॥ सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः ॥ ददृशुर्विस्मिताकारा रावणं राक्षसाधिपं ॥ २८ ॥ ततः पुष्पकं गत्वा तद्वि
मानं मनोजवं आरुह्य सह वैदेह्या पुष्पकं स महाबलः ॥ प्रविवेश ततो लंकां रावणो राक्षसेश्वरः ॥ २९ ॥ तां सुवर्णपरिक्रान्ते शुभे महति वे
श्मनि ॥ प्रविश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः ॥ ३० ॥ तृणवद्भाषितं तस्य तं च नैरृतपुङ्गवं अचिन्तयित्वा वैदेही अशोकवनिकां ग
ता ॥ ३१ ॥ प्रवर्तत तदा रामो मृगं हत्वा तदा वने ॥ निवर्तमानः काकुत्स्थो दृष्ट्वा गृध्रं स विव्यथे ॥ ३२ ॥ ॥

ते ॥ ३० ॥ तस्य रावणस्य भाषितं तृणवत् मत्वेति शेषः तं च नैरृतपुंगवं अचिन्तयित्वा पती वैदेही अशोकवनिकां गता तत्रैव स्थिता इत्यर्थः ॥ ३१ ॥ ३२ ॥

राम.
३४३ ॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

त दा वैदेही मा तो राघवः पितृसखं गृध्रं हतं दृष्ट्वा गोदावरीमद्रो हे शांश्चाचचारेत ॥ उष्णिता नित्यनेन पुष्पलोभेन किं स्त्री नागजेतिम तिर्यक्जूते तत्र महारूपे कबंधं नाम रा
क्षसमासेदतुः राघवाविति शेषः ॥२३॥ २४॥ कबंधवचनात् निहतं दग्ध्वा कबंधवचनादित्यर्थः ॥२५॥ ततस्तपोः शर्वप्रस्ता सा चिरंधपा सर्वधामस्य प्रवृत्तो न सुग्रीवस
हृदादर्शनेन हार्दः समागमः मानसं सख्यं जातमित्यर्थः सुग्रीवस्य रामसख्यापेक्षणे कारणमाह ॥ भ्रात्रेति ॥२६॥ यतो वालिना निरस्तः अतस्तपोऽतितो ताः संवादाद

गृध्रं हत्वा तदा हृष्ट्वा रामः प्रियतरं पितुः मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः ॥२३॥ गोदावरीमनुचरद्वनोद्देशांश्च पुष्पितान्
आसेदतुर्महारण्ये कबंधं नाम राक्षसं ॥२४॥ ततः कबंधवचनाद्रामः सत्यपराक्रमः ऋष्यमूकं गिरिं गत्वा सुग्रीवेण समागतः
॥२५॥ ततः समागमं हर्षप्रीत्या हार्दो व्यजायत ॥ भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा ॥२६॥ इतरेतरसंवादात्प्रगाढः
प्रणयस्तयोः राम इसु वाङ्कीर्ये तात्वारामपादपन ॥२७॥ वालिनं समरे हत्वा महाकायं महाबलं ॥ सुग्रीवं स्थापयित्वा राज्ये स
हितः सर्ववानरैः ॥२८॥ रामायणमिति ज्ञानी तेराजप्रत्यागतुम् आगते आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना ॥ दशकोटिसवग
नाः सर्वाः प्रस्थापिता दिशः ॥२९॥ तेषां नो विप्रनष्टानां विंध्यपर्वतसत्तमे ॥ भृशं शोकाभितप्तानां महान्कालोऽभ्यवर्तत ॥४०॥ भ्रा
ता तु गृध्रराजस्य संपातिर्नाम वीर्यवान् ॥ समाख्याति स्म च सीतां रावणमंदिरे ॥४१॥ ॥

अस्योत्पत्यो जनकथनप्रगाढः प्रणयश्चासीत् ॥२७॥ २८॥ रामायेति अत्र क्रमो न विवक्षितः राज्यप्राप्तेः पूर्वमेव प्रतिज्ञातत्वात् आदिष्टाः नियुक्ताः स्थापितार
ति संबंधः ॥२९॥ विप्रनष्टानां विलंबवेशानां तेषां निर्गमिष्मार्गमज्ञानाना मित्यर्थः ॥४०॥ ४१॥ ॥ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ज्ञाति नामित्रवरेषा श्रावयत्सर्व ॥४१॥ ४२॥ मणिरसौ तामकाशात् च्छ्रमणीं लब्धेत्सर्यः ॥४४॥ मयाचेति क्रिया मेदात प्राट इदं ॥४५॥ जीवितमाशंसमानः
पुर्वजीविते भिराशः स्थितः जीवितं तं अप्रसन्नातुरः अमृतपीत्वाप्याजीवितमाशांसत पीयर्थः ॥४६॥ उद्घजमाजे जयीनेनेति उद्योगं बलं तद्योजयिष्यन्

सोऽहं दुःखपरीताङ्गो दुःखं तत्र तदाजिनात् हरन् ॥ आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ॥४२॥ तत्राहमेकामद्राक्षमशोकवनिकां गतां
कौशेयवस्त्रां मलिनां निरानंदां दृढव्रतां ॥४३॥ तया समेत्य विधिवत् पृष्ट्वा सर्वमनिंदितां अभिज्ञानं मया दत्तं रामनामांगुलीयकं ॥ अ
भिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः ॥४४॥ मया च पुनरागम्य रामस्याक्लिष्टकर्मणः ॥ अभिज्ञानं मया दत्तमर्चिष्मान् स महामणिः
॥४५॥ श्रुत्वा तां मैथिलीं हृष्टस्त्वाशशंसे च जीवितं ॥ जीवितांतमनुप्राप्तः पीत्वामृतमिवातुरः ॥४६॥ उद्योजयिष्यन्नुद्योगं दध्रे लंका
वधे मनः ॥ जिघांसुरिव लोकांते सर्वांल्लोकान् विभावसुः ॥४७॥ ततः समुद्रमासाद्य नलं सेतुमकारयत् ॥ अतरत्कपिवीराणां वा
हिनी तेन सेतुना ॥४९॥ प्रहस्तमवधीन्नीलः कुंभकर्णं तु राघवः ॥ लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणं ॥५०॥ स शक्रेण समागम्य य
मेन वरुणेन च ॥ महेश्वरस्वयंभूभ्यां तथा दशरथेन च ॥५१॥ तैश्च दत्तवरः श्रीमानृषिभिश्च समागतः ॥ महेश्वरैः सु
रर्षिभिश्च काकुत्स्थो वराँल्लेभे परंतपः ॥५१॥ स तु दत्तवरः प्रीत्या वानरैश्च समागतः ॥ पुष्पकेण विमानेन किष्किंधामभ्युपागमत् ॥५२॥
तां गंगां पुनरासाद्य वसंतं मुनिसन्निधौ ॥ अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ॥५२॥ ॥

प्रोत्साहयिष्यन् ॥४०॥४९॥५०॥५१॥५१॥५२॥ पुनर्गंगामासाद्य मुनिसन्निधौ भरद्वाजसमीपे ॥ अद्य वसंतं ॥ अविघ्नं पुष्ययोगेन श्वो रामं द्र
ष्टुमर्हसि ॥५२॥ ॥ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

निशम्य रामागमनमिति शेषः मे मनोरथः पूर्णः त्वत्सिद्धवाचेति संबंधः ॥५४॥ इत्येकोनत्रिंशदधिकशततमः सर्गः परमानंदं परमानंदकरं वचः इति शेषः दैवता
नि कुलदैवतानि नगरस्य चैत्यानि साधारणदेवायतनानि च अर्चंतु अर्चयंतु ॥२॥ स्तुतिपुराणज्ञाः सूतास्तत्र लक्षणं सूतविशेषणं वैतालिकाः वैणववालिकी
नैकाः ॥३॥ राजदाराः मातरः सैन्याः राजभवनात् ॥ भतिर्मत्तोपथ्यंतराः सेनागणाः आदवि कांतसेनाभेदाः ॥ श्रेणीमुख्याः श्रेणीनानाजातीयसंघाः ॥४

ततः स वाक्यैर्मधुरैर्हनूमतो निशम्य हृष्टो भरतः कृतांजलिः ॥ उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णः खलु मे मनोरथः
॥५४॥ इत्यार्षे॰ वा॰ यु॰ एकोनत्रिंशच्छततमः सर्गः ॥१२९॥ श्रुत्वा तु परमानंदं भरतः सत्यविक्रमः हृष्टमाज्ञापयामास ॥ शत्रुघ्नं पर
वीरहा ॥१॥ दैवतानि च सर्वाणि चैत्यानि नगरस्य च ॥ सुगंधमाल्यैर्वादित्रैरर्चंतु शुचयो नराः ॥२॥ सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिका
स्तथा ॥ सर्वे वादित्रकुशला गणिकाश्चैव सर्वशः ॥३॥ राजदारास्तथामात्याः सैन्याः सेनांगनागणाः ॥ ब्राह्मणाश्च सराजन्याः श्रे
णीमुख्यास्तथा गणाः ॥ अभिनिर्यांतु रामस्य द्रष्टुं शशिनिभं मुखं ॥४॥ भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा ॥ विष्टीरनेकसाहस्री
श्चोदयामास भागशः ॥५॥ समीकुरुत निम्नानि विषमाणि समानि च ॥ स्थानानि च निरस्यंतां नंदिग्रामादितः परं ॥६॥ सिंचंतु पृथिवीं कृत्स्नां
हिमशीतेन वारिणा ॥ ततोऽभ्यवकिरंत्वन्ये लाजैः पुष्पैश्च सर्वशः ॥७॥ ॥ ॥

विष्टीर्भृतिकरान् भागशो विभज्येति शेषः ॥५॥ विषमाणि स्थलानि निम्नस्थलत्वमयहेशाः समानि च स्थानानि निरस्यंतां अयं भेदो निर्णयक्रियतां सर्वं समीकुरुतेति सं
बंधः इतो नंदिग्रामात्स्वरथावधि यो देशस्तावदेव गंतव्यदेशत्वादिति भावः ॥६॥ अन्ये पुरुषा हिमवच्छीतेन वारिणा सिंचंतु ततः सेकानंतरं लाजादिभिः किरंतु ॥७॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु॰
॥३४५॥

समुच्छ्रितपताकाढ्याः सूर्यस्योदयनं प्रतियावत्सूर्यउदेतितावदेवसमुच्छ्रितपताकाढ्या वेश्मानि च शोभयंतीति संबंधः ॥ ९ ॥ स्रग्भिः माल्याभिः दामभिः ल
वकैः सुक्तपुष्पैः केवलपुष्पैः पुष्पविशेषगुच्छैः वर्णैरिति पंचवर्णकैः पंचवर्णकल्पितैरलंकारैः ॥ १० ॥ ततः शास्त्रप्रसन्नच्छायासनं श्रुत्वा मुदान्विताः संतो

समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ॥ शोभयंतु च वेश्मानि सूर्यस्योदयनं प्रति ॥ ९ ॥ स्रग्दाममुक्तपुष्पैश्च सुवर्णैरजतै
रपि ॥ राजमार्गमसंबाधं किरंतु शतशो नराः ॥ १० ॥ ततस्तच्छासनं श्रुत्वा शत्रुघ्नस्य मुदान्विताः ॥ ११ ॥ स्त्रीर्जयंतो विजयः सिद्धार्थ
श्चार्थसाधकः ॥ अशोको मंत्रपालश्च सुमंत्रश्चापि निर्ययुः ॥ ११ ॥ मत्तैर्नागसहस्रैश्च सध्वजैः स्वविभूषितैः ॥ अपरे हेमकक्ष्या
भिः सगजाभिः करेणुभिः ॥ १२ ॥ निर्ययुस्तुरगाक्रांता रथैश्च सुमहारथाः ॥ शक्त्यृष्टिपाशहस्तानां सध्वजानां पताकिनां ॥ १३ ॥
तुरगाणां सहस्रैश्च मुख्यैर्मुख्यतरान्वितैः ॥ पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ १४ ॥ ततो यानान्युपारूढाः सर्वाः दशरथ
स्त्रियः ॥ कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥ १५ ॥ द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः ॥ माल्यामोदकहस्तैश्च
मंत्रिभिर्भरतो वृतः ॥ १६ ॥ शंखभेरीनिनादैश्च वंदिभिश्चाभिनंदितः ॥ पादुके ते गृहीत्वा तु शिरसा धर्मकोविदः ॥ १७ ॥ पांडुरं छत्र
मादाय शुक्लमाल्योपशोभितं ॥ शुक्ले च वालव्यजने रा

ध्यायम्॥ ग्रामपरमं त्रिशोत्रि निर्ययुः ॥ उदयात्पूर्वं यथोक्तं राजमार्गसत्कारं कृत्वा प्रातर्नि
र्ययुरित्यर्थः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ नैगमा वणिजः वैदेहिकः सार्थवहो नैगमो वणिजो वणिगित्यमरः ॥ १६ ॥ आर्यपादौ श्रीरामपादुके ॥ १७ ॥ १८ ॥ रम॰
॥३४५॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तत्पूर्वं भ्रागमनश्रवणपूर्वकं हर्षमागत इत्युक्ते न भ्रातृरागमनात्पूर्वे हर्षे नाग तत्पूर्वं हर्षो नास्मादिति व्याख्याते ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ यावद्रामं यावज्जानासि क्षिप्रमागंतु
मर्हसीति हनूमंतं प्रति रामोक्तेर्भरतस्य चाकर्ण्याश्रुत्वा पुनरागमनसमीपं ग्रामं मन्तिभरतं च नांगते निवेद्य पुनर्नंदिग्रामं मंगतिरामागतपागमने रामहनूमोहेत्यमनंतस्य श्री
तिरोध्यं ॥ कापेयी कपित्वभावप्रयुक्ता चलचित्तता न सेव्यते ॥ नानुष्ठीयते कच्चित् ॥ मिथ्या नोच्यते कच्चिदित्यर्थः ॥ कृतापवश्यं कार्यं तत्राह नहीति ॥ २३ ॥

उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः ॥ भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः ॥ १९ ॥ प्रत्युद्ययौ तदा रामं महात्मा स
चिवैः सह अश्वानां खुरशब्दैश्च रथनेमिस्वनेन च ॥ २० ॥ शङ्खदुन्दुभिनादेन संचचालेव मेदिनी ॥ गजानां बृंहितैश्चापि शङ्ख
दुन्दुभिनिस्वनैः ॥ २१ ॥ कृत्स्नं तु नन्दिग्राममुपागमत् ॥ समीक्ष्य भरतो वाक्यमुवाच पवनात्मजं ॥ २२ ॥ कच्चिन्न खलु कापेयी सेव्यते
चलचित्तता ॥ न हि पश्यामि काकुत्स्थं राममार्यं परंतपं ॥ २३ ॥ कच्चिन्न चानुदृश्यन्ते कपयः कामरूपिणः ॥ अथैवमुक्ते वचने ह
नूमानिदमब्रवीत् ॥ २४ ॥ अर्थ्यं विज्ञापयन्नेव भरतं सत्यविक्रमं ॥ सदाफलान्कुसुमितान्वृक्षान्प्राप्य मधुस्रवान् ॥ २५ ॥
भरद्वाजप्रसादेन मत्तभ्रमरनादितान् ॥ तस्य चैष वरो दत्तो वासवेन परंतप ॥ २६ ॥ ॥ ॥

२४ ॥ एवं मिथ्यावादित्वशंकापोतं निरवत्तये ऽर्थ्यमर्थादनपेतं विज्ञापयन्निदमब्रवीत् ॥ सदाफलत्वादिविशिष्टान् वृक्षान्प्राप्य प्रहृष्टानां वनौकसां
प्रमोनिस्वनः ॥ सपत्नेऽजलं यथा हीति शेषः ॥ २५ ॥ वृक्षाणामेतादृशत्वं कुत इत्यत्राह । भरद्वाजप्रसादेनेति ॥ तेनापि कथमेवं शक्यं तत्राह । तस्य चेति
भरद्वाजस्य च तपर्थः ॥ वासवेनेति तत्तपःप्रसादेनेत्यर्थः ॥ २६ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पु॰ सत्रिवार्यपतानीकंराक्षससेनं ॥ २० ॥ प्राणांस्त्यक्त्वा प्राणाहि हमपि त्यक्त्वा विचेष्टं तं संतो ऽमपि पचिकीर्षया पत्रिमित्रं पश्याम सा जनकात्मजा हते निव्यर्थो
॥ २३४ ॥ यं श्रमहृतिभावः ॥ २१ ॥ प्रतिविधास्येमतेयति क्रियात्र शाने निर्यो स्तेतेतत्करिष्यामहे ॥ २२ ॥ २३ ॥ निकुंभिलां चैत्यं निकुंभिलां त्वदेवापतनमित्यर्थः ॥ २४ ॥

संनिवार्य पतानीकं मद्वचीत्राच्चनौकसः ॥ हनूमान्संनिवर्तध्वं न नः साध्यमिदं बलं ॥ २० ॥ त्यक्त्वा प्राणान्न विचेष्टमोऽमपि पचिकी
र्षया ॥ पत्रिमित्रंहिपश्यामो हतासा जनकात्मजा ॥ २१ ॥ इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च ॥ तौ यत्प्रति विधास्येते तत्करिष्यामहे
वयं ॥ २२ ॥ इत्युक्त्वा वानरश्रेष्ठो वारयन्सर्ववानरान् ॥ शनैः शनैः संत्रस्तः सबलः संन्यवर्तत ॥ २३ ॥ ततः प्रेक्ष्य हनूमंतं व्रजंतं यत्र
राघवौ ॥ सहोतुकामो दुष्टात्मा गतश्चैत्यं निकुंभिलां ॥ २४ ॥ निकुंभिलामधिष्ठाय पावकं जुहुवेंद्रजित ॥ यज्ञभूम्यां तु विधि
वत्पावकस्तेन रक्षसा ॥ २५ ॥ हूयमानः प्रजज्वाल होमशोणितभुक्तदा ॥ सोर्चिष्पिनद्धो ददृशे होमशोणिततर्पितः ॥ संध्याग
त इवादित्यः सुतीव्रोग्निः समुत्थितः ॥ २६ ॥ अथेंद्रजिद्राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित् ॥ दृष्ट्वा व्यतिष्ठ
त च राक्षसास्ते महासमूहेषु नयानयज्ञाः ॥ २७ ॥ इसा॰ षे॰ वा॰ पु॰ द्व्यशीतितमः सर्गः ॥ ८२ ॥

जुहवज्जुहाव ॥ २५ ॥ होमशोणितभुक् होमार्थमाहृतनितेन मस्विम शोणितं भुक् ॥ अर्चिर्भिः पिनद्धः संजातो यस्यात्पिनः सोचिपरस्तुच कोददृशे ॥ २६ ॥ राम
महासमूहेषु हेष्वनपनपत्ता॰ हत्या हत्यतत्तद्वजाः ॥ २७ ॥ इति द्व्यशीतितमो सर्गः ॥ ८२ ॥ ॥ ॥ २३४ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु॰
॥२४६॥

यदेवमतः सैसे मसमतवामस्य चमरहूजेनसर्वरत्नानचितमाजियपुंस्तूतं ॥२७॥ यतोध्वनिःस्मृपजेः तः सासेनावालकीनततरतीति मन्ये क्षणाकं नमाह ॥ एनोवर्षमिति
॥२८॥ स्पर्णोन्नमाह ॥ तदेतदिति ॥२९॥ मनसा ब्रह्मनिर्मितं ॥ विश्वकर्मणा मनसा ब्रह्मार्थे निर्मितमित्यर्थः ॥३०॥ दिव्यं मनोजवमेतद्धि मानं प्रसादे नवसवामसा दे

ससैन्यस्य तदाविप्यं पुष्पकं सर्वगुणान्वितं ॥ नित्यनः स्पृशते भीमः प्रहृष्टानां वनौकसां ॥२८॥ मन्ये वानरसेनायामानदीतरतिवालुका
जो वर्षस्तसुहृत्तं पश्यमानवनं मति ॥२९॥ मन्यमाने वनं रम्ये लोत्पयंतिसर्वगमाः ततेनहपुष्पते तद्विमानं चंद्रसन्निभं ॥३०॥ विमा
नं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितं ॥ रावणं बांधवैः सार्धं हत्वा लब्धं महात्मना ॥३१॥ जहत्यपदित्यसकाशो विमानेन महाहर्ते ॥ धनद
स्य प्रसादेन दिव्यमेतन्मनोजवं ॥३२॥ तस्मिन्स्थ्रभूरी वैदेह्या सहराघवो ॥ सुग्रीवो भ्रमहातेजा रक्षसां सविभीषणः ॥३३॥
ततो हर्षसमद्देना नित्यनोदिवमस्पृशत ॥ स्त्रीबालयुववृद्धानां रामोयमितिकीर्तिते ॥३४॥ पृथ्वकुंजरवाजिस्थास्तेवनीपमहीं
गताः ॥ ददृशुस्तं विमानस्थं नराः सोममिवांबरे ॥३५॥ प्राजलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः ॥ स्वागतेनार्थ्यपाद्यैश्च
तोरामसमपूजयत ॥३५॥ मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः ॥ रराज पृथुदीर्घाक्षो वज्रपाणिरिवामरः ॥३६॥

ग्री ८

नधनदस्य भवतीति शेषः ॥ परेणानपत्या सेमे पलक्षेरः पितामहाद्दितिसुंदरकां ञोक्तेः ॥३१॥ तस्मिन्रावि मानेरघवोस्थयीवौविभीषणा स्थितिष्ठंतीति राम॰
शेषः ॥३२॥ ३३॥ ततश्चासते भरताद्यपलददृशुरित्याहरहीति ॥३४॥ पद्याद्यैर्नस्वागतेन ॥ अर्चयित्वा स्वागतेनेत्यर्थः पसागतमित्यर्थेनग ॥२४६॥
तिमतेत्यर्थः ॥२५॥ ३६॥

३८॥ ३९ अभ्यवादयत॥ अभ्यवंदद्दितिस्पर्थः॥ ३९॥ ४०॥ लक्ष्मणमासाद्य कृतनमस्कारं लक्ष्मणमालिंगनेन संभाव्य वैदेहीं चाभ्यवादयत अप्येषः पंचजनात्म
कैकेय्यां भरतो भवत॥ तस्यैव सुमित्रायां मनं जातस्मात् लक्ष्मणः सुदर्शनात्मा शत्रुघ्नो हैमाता उपगपत भिषे इति र पार्वतीपतिशिवेनोक्तं पप्रछुताणस्य रामायणोक्त

ततो विमानाग्रगतं भरतो भ्रातरं तदा॥ ववंदे प्रणतो रामं मेरुस्थमिव भास्करं॥ ३७॥ ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमं॥ हंस
युक्तं महावेगं निपपात महीतले॥ ३८॥ आरोपितो विमानं तद्भरतः सत्यविक्रमः॥ राममासाद्य मुदितः पुनरेवाभ्यवादयत्॥ ३९॥
तं समुत्थाप्य काकुत्स्थः चिरस्याक्षिपथं गतं॥ अंके भरतमारोप्य मुदितः परिषस्वजे॥ ४०॥ ततो लक्ष्मणमासाद्य वैदेहीं च परंतपः
अभ्यवादयत प्रीतो भरतो नाम चाब्रवीत्॥ ४१॥ सुग्रीवं कैकेयीपुत्रो जांबवंतमथांगदं॥ मैंदं च द्विविदं नीलमृषभं च सस्वजे॥ ४२॥ त: ९१
सुषेणं च नलं चैव गवाक्षं गंधमादनं॥ शरभं पनसं चैव परिषस्वजे॥ ४३॥ ते कृत्वा मानुषं रूपं वानराः कामरूपिणः॥ कुशलं पर्य
पृच्छंस्ते प्रहृष्टा भरतं तदा॥ ४४॥ अथाब्रवीद्राजपुत्रः सुग्रीवं वानरर्षभं॥ परिष्वज्य महातेजा भरतो धर्मिणां वरः॥ ४५॥ त्वमस्माकं
चतुर्णां वै भ्राता सुग्रीव पंचमः॥ सौहृदाज्जायते मित्रमपकारोरिलक्षणं॥ ४६॥ विभीषणं च भरतः सांत्ववाक्यमथाब्रवीत्॥ दि
ष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करं॥ ४७॥

प्रकारेण भरतस्य ज्येष्ठत्वादेवं व्याख्यातं॥ वैदेही चेति चकारो रामनमस्कारं समुच्चिनोति॥ ४१॥ ४२॥ ४३॥
॥ ४४॥ ४५॥ पंचमो भ्राता भ्रातृविषयकपंचत्वसंख्यापूरणः सौहृदात् तत्पूर्वकोपकारात्॥ ४६॥ ४७॥ ॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

४९॥ ४९॥ कैकेयीं च यशस्विनी अस्मास्मनो राघवे राज्यं ज्ञानं रक्षादि तोवाह्न हर्षपश्च परमं सुखं मम मा ॥ रामस्य च यशोजातमरण्यपराप्ति शिवमेव ॥ ५०॥ ५१॥ व्याकोशा
नि विविक्ता सितानि ॥ ५२॥ ५३॥ एतज्जगत्तावरकालं मया रक्षितं ॥ न्यासभूतं मया पित्र्यं ॥ न्यासभूतं राज्यं मया ते निर्यातितं तम्यं निवेदितं ॥ ५४॥ ५५॥ गोष्ठा

शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणं ॥ सीतायाश्चरणौ वीरो विनयादभ्यवादयत् ॥ ४९॥ रामो मातरमासाद्य विवर्णां शोककर्शितां
जग्राह प्रणतः पादौ मनो मातुः प्रहर्षयन् ॥ ४९॥ अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीं ॥ स मातॄश्च ततः सर्वाः पुरोहितमुपागमत्
॥ ५०॥ स्वागतं ते महाबाहो कौसल्यानन्दवर्धन ॥ इति प्राञ्जलयः सर्वे नागरा राममब्रुवन् ॥ ५१॥ तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः
व्याकोशानीव पद्मानि ददर्श भरताग्रजः ॥ ५२॥ पादुके ते तु रामस्य गृहीत्वा भरतः स्वयं ॥ चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित्
॥ ५३॥ अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः ॥ एतत्ते सकलं राज्यं न्यासं निर्यातितं मया ॥ ५४॥ अद्य जन्म कृतार्थं मे संवृत्तश्च
मनोरथः ॥ यत्त्वां पश्यामि राजानमयोध्यां पुनरागतं ॥ ५५॥ अवेक्षतां भवान् कोशं कोष्ठागारं गृहं बलं ॥ भवतस्तेज
सा सर्वं कृतं दशगुणं मया ॥ ५६॥ तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलं ॥ मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ॥ ५७॥
ततः प्रहर्षाद्भरतमङ्कमारोप्य राघवः ॥ ययौ तेन विमानेन ससैन्यो भरताश्रमं ॥ ५८॥ भरताश्रममासाद्य ससैन्यो राघवस्तदा ॥ अ
वतीर्य विमानाग्र्यादवतस्थे महीतले ॥ ५९॥

गां रक्ष्य प्रणाचां दशगुणत्वं रामनिर्गमनकाल कोशाद्यपेक्ष्या ॥ ५६॥ विभीषणा स्ववाष्पं मुमोच
रहस्य अपिधाना संजीतानं देनत स्पृजहेप॥ स्वजशोकेन चेति मावः ॥ ५७॥ भरताश्रमं नन्दिग्रामं ॥ ५८॥ ५९॥ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

६० ॥ ६१ ॥ ६२ ॥ आत्मसमस्तवाउहपस्त एषणासने पगपदेवो प्राविशदित्यर्थः ॥ ६३ ॥ इति त्रिंशदुत्तरशततमः सर्गः ॥ एकं पुष्पकं धनदाप्रप्रेष्य पित्वा वा तिष्ठेन च सं
गम्य भरतो ऽज्ञां विना नायोध्याम वेश्येति ज्ञात्वा पूर्वेणानंदिग्रामम लवीप विष्टे एमसि विष्टपो ऽवर्षैःस विरिज्ञाह च माजस्रुतात्वा लिकतस्यैः गितदर्शन त्रियणे
भरतेनं त्व हदयमयजाय निवेदपति ॥ शिरस्यंजलिमाधायेति ॥ १ ॥ प्रभो त्वया मामिका माता हजिताएज्यपरिपाणाय हूर्वं कं वा तो ऽगीकारेणाजो षिता श्वनं गरं

अब्रवीत्तु जटाधारी मस्तद्विमानमस्तुत्तमं ॥ वहस्वैव बलं देव मनज्ञा नाम्निगम्यतां ॥ ६४ ॥ ततो गमाम्पनगासंतं हिमानमवतुत्तमं ॥ उत्तरां
दिशं प्रसुहिप्रपजगाम धनदालयं ॥ ६५ ॥ विमानं पुष्पकं दिव्यं संगृहीतं तु राक्षसः ॥ आगमहूरं हं देवा दुर्जमवाक्यपचोदितं ॥ ६६ ॥ उ
तो हि जेस्तात्म समस्तत्तुवो वृहस्पतेः शक्रः वामराधिपः । त्रिपीजूपादेषएपणामने शुभे सहेवन्ते ऽप विवे शचीपुरा ॥ ६७ ॥ उ
त्यार्षं० वा० पु० मधुमित्रपद्म षष्ठ्याम भिराम रामभ्रातृसम्मागमने सरामानुजमित्रवर्गसहिते स्वराज्यमर्पणे त्राभ्यां प्रवेशो नाम त्रिंशत
शततमः सर्गः ॥ १३० ॥ शिरस्यंजलिमाधाय कैकेय्यानंदवर्धनः ॥ वभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमं ॥ १ ॥ पूजिता मामिका माता
दत्तं राज्यमिदं मम ॥ तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥ २ ॥ धुरमेकाकिना न्यस्तामृषभेणावलीयसा ॥ किशोरीवगुरुंभारं नवोढुमह
मुत्सहे ॥ ३ ॥

ममपारंदं राज्यचित्रकूटे दत्तं तद्राज्यं त्वेप यापेन मकारेण महामदर्शनेन प्रकाहेपनत्तुभ्यं ददामि त्याशत्वहपेणा मविष्यापितं राज्यं पुन
र्दं हमीत्यर्थः ॥ २ ॥ त्वमेव राज्यं परिपालयेत्याशं सह ॥ धुरमिति ॥ एकाकिना त्र महायेने वलीयसा वृषभेणान्यस्तां धुरं किशोरीवत्सो वत्सरुत्वे वत्सहं भारं वोढुमहं
नोत्सहे ॥ ३ ॥ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पु॰
॥२४५॥ नोत्सहे रन्तुं हेतुमाह ॥ वारीति महता वारिवेगेन भित्त्रः क्षरन् सेतुर्यथा दुर्निवंधो वद्धुमशक्यस्तथैवमसंवृतं मशक्यः संवरणं राज्यच्छिद्रं चौरादिनिर्वंधं ॥ दुर्निवंध
नं ॥ वद्धुमशक्यमित्येवमस्मे स्मृहमितिशेषः ॥४॥ तवमार्गेरस्त्रणीपरक्षणाच्चतुर्थ ॥५॥ वंशपरंपरया प्राप्तराज्यपरिपालनार्थं दशरथेनोत्पादितं बहितस्यामम
स्य सकलगुणसंपन्नस्याप्यभिषेकः सर्वं कर्तव्यं प्रजापरिपालनतरफलासदर्शमात्रफलप्रदर्शीकवचोऽपि अन्नाहयथा वेत्यादिश्लोकत्रयेणास्त्रं नत्विंदेशानेरहा

